| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| कुटजगतिः | कुटजगतिर्नजौ सप्तत्तुं मृतौ गुरुः<br>।।।,।ऽ।,ऽऽऽ,ऽऽ।,ऽ | |
| प्रभावती । | यस्यां प्रिये ! प्रथमकमचरद्वयं<br>तुर्य्यं तथा गुरु नवमं दशान्तिमम् ।<br>सान्त्यं भवेद्‌यतिरपि चेद्युगग्रहैः<br>सा लक्ष्यतामम्टतरुते ! प्रभावती ॥ | |
| चतुर्द्दशाक्षरा वृत्तिः । शर्करी ।<br>असम्बाधा<br>पञ्चभिर्नवभिश्च यतिः । | मो गो गो नौ मः शरनवभिरसम्बाधा<br>ऽऽऽ,ऽ,ऽ,।।।,।।।,ऽऽऽ | वीर्य्याग्नौ येन ज्वलति रणरसात् क्षिप्ते<br>दैत्येन्द्रे जाता धरणिरियमसम्बाधा ।<br>धर्म्मस्थित्यर्थं प्रकटिततनुसम्बन्धः<br>साधूनां बाधां प्रशमयतु स कंसारिः ॥ |
| वसन्ततिलकम्<br>अष्टाभिः षड्‌भिश्च यतिः । सिंहोद्धता क्वापि । सिंहोन्नता इति सुनिकाश्यपः । उद्धर्षिणी इति सुनिसैतवः ॥ | ज्ञेयं वसन्ततिलकं तभजा जगौ गः<br>ऽऽ।,ऽ।।,।ऽ।,।ऽ।,ऽ,ऽ | फुल्लं वसन्ततिलकं तिलकं वनाल्या<br>लीलापरं पिककुलं कलमत्र रौति ।<br>वात्येष पुष्पसुरभिर्मलयाद्रिवातो<br>यातो हरिः स मथुरां विधिना हताः स्मः ॥ |
| अपराजिता<br>सप्तभिर्यतिः । | ननरसलघुगैः स्वरैरपराजिता ।।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ | यदनवधिभुजप्रतापकृतास्पदा<br>यदुनिचयचमूः परैरपराजिता ।<br>व्यजयत समरे समस्तरिपुव्रजं<br>स जयति जगतां गतिर्गरुड़ध्वजः ॥ |
| प्रहरणकलिका<br>सप्तभिर्व्वर्णैर्यतिः । | ननभनलगिति प्रहरणकलिका ।।।,।।।,ऽ।।,।।।,।,ऽ | व्यथयति कुसुमप्रहरण ! कलिका<br>प्रमदवनभवा तव धनुषि तता ।<br>विरहविपदि मे शरणमिह ततो<br>मधुमथनगुणस्मरणमविरतम् ॥ |
| वासन्ती | मात्तो नो मो गौ यदि गदिता वासन्तीयम्<br>ऽऽऽ,ऽऽ।,।।।,ऽऽऽ,ऽ,ऽ | भ्राम्यद्‌भृङ्गीनिर्भरमधुरालापोद्गीतैः<br>श्रीखण्डाद्रेरङ्कुतपवनैर्मन्दान्दोला ।<br>लीलालोला पल्लवविलसद्धस्तोल्लासैः<br>कंसारातौ नृत्यति सदृशी वासन्तीयम् ॥ |
| लोला<br>अस्याः सप्तभिर्यतिः । | द्विःसप्तच्छिदि लोला मृसौ म्भौ गौ चरणे चेत्<br>ऽऽऽ,।।ऽ,ऽऽऽ,ऽ।।,ऽ,ऽ | मुग्धे यौवनलक्ष्मीर्विद्युद्विभ्रमलोला<br>त्रैलोक्याद्भुतरूपो गोविन्दोऽतिदुरापः ।<br>तद्‌वृन्दावनकुञ्जे गुञ्जद्‌भृङ्गसनाथे<br>श्रीनाथेन समेता स्वच्छन्दं कुरु केलिम् ॥ |
| नान्दीमुखी<br>अस्याः सप्तभिर्यतिः । | स्वरभिदि यदि नौ तौ च नान्दीमुखी गौ<br>।।।,।।।,ऽऽ।,ऽऽ।,ऽ,ऽ, | सरसखगकुलालापनान्दीमुखीयं<br>लहरिभुजलता चारुफेनस्मितश्रीः ।<br>सुरहरकलयासक्तिमासाद्य किन्ते<br>प्रमुदितहृदया भानुजा नृत्यतीह ॥ |
| इन्दुवदना | इन्दुवदना भजसनैः सगुरुयुग्मैः ऽ।।,।ऽ।,।।ऽ,।।।,ऽ,ऽ | |
| नदी<br>सप्तभिर्यतिः । | ननतजगुरुगैः सप्तयतिर्नदी स्यात्<br>।।।,।।।,ऽऽ।,।ऽ।,ऽ,ऽ | |
| लक्ष्मीः | लक्ष्मीरन्तविरामा मृसौ तभौ गुरुयुग्मम्<br>ऽऽऽ,।।ऽ,ऽऽ।,ऽ।।,ऽ,ऽ | |
| सुपवित्रम् | त्रिननगगिति वसुयति सुपवित्रम्<br>।।।,।।।,।।।,।।।,ऽ,ऽ | |
| मध्यक्षामा | मध्यक्षामा युगदशविरमा म्भौ न्यौ गौ<br>ऽऽऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ | |
| कुटिलम् | युगदिग्‌भिः कुटिलमिति सभौ न्यौ गौ चेत्<br>।।ऽ,ऽ।।,।।।,।ऽऽ,ऽ,ऽ | |
| प्रमदा | नजभजला गुरुश्च भवति प्रमदा<br>।।।,।ऽ।,ऽ।।,।ऽ।,।,ऽ | |